# श्री मल्लिकार्जुन मङ्गलाशासनम्

उमाकान्ताय कान्ताय कामितार्थ प्रदायिने
श्रीगिरीशाय देवाय मल्लिनाथाय मङ्गलम् ॥

सर्वमङ्गल रूपाय श्री नगेन्द्र निवासिने
गङ्गाधराय नाथाय श्रीगिरीशाय मङ्गलम् ॥

सत्यानन्द स्वरूपाय नित्यानन्द विधायने
स्तुत्याय श्रुतिगम्याय श्रीगिरीशाय मङ्गलम् ॥

मुक्तिप्रदाय मुख्याय भक्तानुग्रहकारिणे
सुन्दरेशाय सौम्याय श्रीगिरीशाय मङ्गलम् ॥

श्रीशैले शिखरेश्वरं गणपतिं श्री हट केशं
पुन स्सारङ्गेश्वर बिन्दुतीर्थममलं घण्टार्क सिद्धेश्वरम् ।
गङ्गां श्री भ्रमराम्बिकां गिरिसुता मारामवीरेश्वरं
शङ्खं चक्रवराह तीर्थमनिशं श्रीशैलनाथं भजे ॥

हस्तेकुरङ्गं गिरिमध्यरङ्गं शृङ्गारिताङ्गं गिरिजानुषङ्गम्
मूर्देन्दुगङ्गं मदनाङ्ग भङ्गं श्रीशैललिङ्गं शिरसा नमामि ॥

Web Url: http://www.vignanam.org/veda/sree-mallikarjuna-mangalasasanam-devanagari.html